## 'Avidya in deep sleep and avastha traya prakriya'

A few instances in the bhashya which support the idea: there is an avidya that is present in sleep, which is the seed for the waking-dream perceived duality/multiplicity/variety. Translations for the passages are not provided.

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥ 3.2.9 Brahma sutra.

Bhashya:

जलबिन्दोरनुद्धरणम् , इह तु विद्यते विवेककारणम् — कर्म च अविद्या च, इति वैषम्यम् । दृश्यते च दुर्विवेचनयोरप्यस्मज्जातीयैः क्षीरोदकयोः संसृष्टयोः

The Purvapakshi says: It is impossible for the same jiva who went to sleep, having merged in Sat, to wake up. Just as one cannot retrieve the same drop of water one has added to a water body. The siddhantin says: there is no differentiating factor that can enable one to retrieve the 'same' drop of water, from the water body. In the case of the jiva, however, there are the factors, **karma and avidya,** of the jiva that enable the same jiva to wake up from sleep.

[It is unambiguous in the bhashya that the word 'iha' (here) refers to deep sleep. But Sri SSS, hastens to add a remark in the footnote: Needless to say it is indeed wrong to take the meaning 'in deep sleep' for the word 'iha' (here) of the bhashya and claim 'there is avidya in deep sleep'.

The mantras cited in the Bhashya, from Brihadaranyaka and Chandogya, are also about the jiva entering deep sleep and coming out of it.]

Aitareya bhashyam: 1.3.12

तेषु ह्ययमावसथेषु पर्यायेणात्मभावेन वर्तमानोऽविद्यया दीर्घकालं गाढं प्रसुप्तः स्वाभाविक्या, न प्रबुध्यतेऽनेकशतसहस्रानर्थसंनिपादजदुःखमुद्गराभिघातानुभवैरपि ॥

Here too the bhashya is very clear: the jiva, owing to his 'svaabhaavika avidya' perceives the three states of waking, dream and sleep as his true states of life.
Sri SSS, as expected, foresees a claim for this avidya to be a native avidya of the jiva and explains it as: this avidya is only a 'lack of enquiry'.

In the Mandukya karika bhashya 1.16:

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ १६ ॥

योऽयं संसारी जीवः, सः उभयलक्षणेन तत्त्वाप्रतिबोधरूपेण बीजात्मना (aavarana - kaarana avidya), अन्यथाग्रहणलक्षणेन (vikshepa - kaarya avidya) चानादिकालप्रवृत्तेन मायालक्षणेन स्वापेन, ममायं पिता पुत्रोऽयं नप्ता क्षेत्रं गृहं पशवः, अहमेषां स्वामी सुखी दुःखी क्षयितोऽहमनेन वर्धितश्चानेन इत्येवंप्रकारान्स्वप्नान् स्थानद्वयेऽपि पश्यन्सुप्तः, यदा वेदान्तार्थतत्त्वाभिज्ञेन परमकारुणिकेन गुरुणा 'नास्येवं त्वं हेतुफलात्मकः, किन्तु तत्त्वमसि' इति प्रतिबोध्यमानः, तदैवं प्रतिबुध्यते । कथम् ? नास्मिन्बाह्यमाभ्यन्तरं वा जन्मादिभावविकारोऽस्ति, अतः अजम् 'सबाह्याभ्यन्तरो ह्यजः' (मु. उ. २ । १ । २) इति श्रुतेः, सर्वभावविकारवर्जितमित्यर्थः । यस्माज्जन्मादिकारणभूतम् , नास्मिन्नविद्यातमोबीजं निद्रा विद्यत इति अनिद्रम् ; अनिद्रं हि तत्तुरीयम् ; अत एव अस्वप्नम् , तन्निमित्तत्वादन्यथाग्रहणस्य । यस्माच्च अनिद्रमस्वप्नम् , तस्मादजम् अद्वैतं तुरीयमात्मानं बुध्यते तदा ॥

Shankara on Avasthatraya:

ब्रह्मसूत्रभाष्यम्द्वितीयोऽध्यायःप्रथमः पादः सूत्रम् ९ - भाष्यम्

.........इति । यथा च स्वप्नदृगेकः स्वप्नदर्शनमायया न संस्पृश्यते, प्रबोधसम्प्रसादयोरनन्वागतत्वात् , एवमवस्थात्रयसाक्ष्येकोऽव्यभिचार्यवस्थात्रयेण व्यभिचारिणा न संस्पृश्यते । मायामात्रं ह्येतत् , यत्परमात्मनोऽवस्थात्रयात्मनावभासनम् , रज्ज्वा इव सर्पादिभावेनेति । अत्रोक्तं वेदान्तार्थसम्प्रदायविद्भिराचार्यैः — 'अनादिमायया.........

ब्रह्मसूत्रभाष्यम्चतुर्थोऽध्यायःचतुर्थः पादःसूत्रम् २ - भाष्यम्

.........— 'अन्धो भवति' 'अपि रोदितीव' 'विनाशमेवापीतो भवति' — इति च अवस्थात्रयकलुषितेन आत्मना — इत्ययं विशेषः । कथं पुनरवगम्यते — मुक्तोऽयमिदानीं भवतीति ? प्रतिज्ञानादित्याह — तथा हि — 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' (छा. उ. ८ । ९ । ३) इति अवस्थात्रयदोषविहीनम् आत्मानम् व्याख्येयत्वेन प्रतिज्ञाय, 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः'.........

Mandukya bhashya:

तस्यापरमार्थरूपमविद्याकृतं रज्जुसर्पादिसममुक्तं पादत्रयलक्षणं बीजाङ्कुरस्थानीयम् । अथेदानीमबीजात्मकं परमार्थस्वरूपं रज्जुस्थानीयं सर्पादिस्थानीयोक्तस्थानत्रयनिराकरणेनाह — नान्तःप्रज्ञमित्यादिना ।

नप्रज्ञानघनमिति सुषुप्तावस्थाप्रतिषेधः, बीजभावाविवेकस्वरूपत्वात्

Padmapadacharya in Panchapadika:

स पुनरेवंभूतो जाग्रत्स्वप्नयोरहमुल्लेखरूपेण, सुषुप्ते तत्संस्काररञ्जिताग्रहणाविद्याप्रतिबद्धप्रकाशत्वेन च गतागतमाचरन् संसारी, जीवः विज्ञानघनः, विज्ञानात्मा, प्राज्ञः, शरीरी, शारीरः, आत्मा, सम्प्रसादः, पुरुषः, प्रत्यगात्मा, कर्ता, भोक्ता, क्षेत्रज्ञः इति च श्रुतिस्मृतिप्रवादेषु गीयते ।

In line with Shankara in the Mandukya bhashya, Padmapada accepts avidya in sushupti.

Anandagiri on Mandukya bhashya:

यो हि पादत्रयं प्रागुक्तया प्रक्रियया प्रविलाप्य तुरीये नित्ये विज्ञप्तिमात्रे सदानन्दैकताने परिपूर्णे प्रतिष्ठां.........

तुरीयस्य पादत्रयविलक्षणस्यार्थादेव सिद्धावपि जीवात्मनः स्थानत्रयविशिष्टस्य तुरीयं ब्रह्मस्वरूपमिति नोपदेशमन्तरेण सिद्ध्यतीति तुरीयग्रन्थोऽर्थवानित्यर्थः।

प्रथमचोद्योत्तरत्वेन पादत्रयं व्याचष्टे – यस्मादिति । विलक्षणमनात्मानमिति यावत् । अनृतमित्यस्य व्याख्यानमविद्याबीजप्रसूतमिति

Sri Appayya Dikshitar in Nyayarakshamani: On avastha traya:

न्यायरक्षामणिःप्रथमोऽध्यायःतृतीयः पादः सूत्रम् २० - भाष्यम्

---

.........अथवा य एष सम्प्रसादः श्रीमद्भाष्यदर्शितरीत्याऽवस्थात्रयवान् , एष एवापहतपाप्मत्वादिगुणक आत्मा अमृतमभयं ब्रह्म चेति जीवस्यावस्थात्रयविलयेन पारमार्थिकब्रह्मभावोपदेशार्थो जीवपरामर्शः । अयं भामतीस्वरससिद्धोऽर्थः ।

Bhamati on avastha traya:

**एवमवस्थात्रयसाक्ष्येक इति ।** अवस्थात्रयमुत्पत्तिस्थितिप्रलयाः ।

Anandagiri on Brahmasutra bhashya:

न्यायनिर्णयव्याख्या

......... परमात्मनो वस्तुतोऽवस्थात्रयासम्बन्धे वृद्धसंमतिमाह - अत्रेति ।

न्यायनिर्णयव्याख्या

......... परस्यावस्थात्रयासम्बन्धे फलितमाह - तत्रेति । .........

जागरिते पुत्रादावहंममाभिमानादन्धवत्परवशो भवति स्वप्ने तन्नाशदृष्ट्या वासनामयं रोदनाद्यनुभवति सुषुप्ते विशेषज्ञानशून्यश्चिद्धातुरज्ञानमात्रपरवशस्तिष्ठतीत्यवस्थात्रयेण बन्धापरनाम्ना कालुष्येण दूषितं यदात्मरूपं तेनात्मा संसारदशायामवतिष्ठते मोक्षे तु निर्मृष्टनिखिलदुःखानुषङ्गप्रद्योतमानपरिशुद्धपरमानन्दरूपेणेति.........

This is in perfect tune with Shankara: In sushupti the visheshajnana, that is, the duality perceived by senses/mind, is not there but the ajnana alone is present. Shankara says in Mandukya bhashya: उभयलक्षणेन तत्त्वाप्रतिबोधरूपेण बीजात्मना (aavarana - kaarana avidya), अन्यथाग्रहणलक्षणेन (vikshepa - kaarya avidya)

and स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥ 3.2.9

जलबिन्दोरनुद्धरणम् , इह तु विद्यते विवेककारणम् — कर्म च अविद्या च, इति वैषम्यम् । दृश्यते च दुर्विवेचनयोरप्यस्मज्जातीयैः क्षीरोदकयोः संसृष्टयोः

आनन्दगिरिटीका (ऐतरेय)

.........प्रापद्यत" इति प्रवेशोक्तेः । " तस्य त्रय आवसथास्त्रयः स्वप्नाः" इति जाग्रदाद्यवस्थात्रयस्य स्वप्नत्वेन मिथ्यात्वोक्त्युपपत्तेश्च निर्विशेषाद्वितीयात्मपरत्वावगमनेन

आनन्दगिरिटीका (बृहदारण्यक)

......... अवस्थात्रयेऽप्यसंगत्वमनन्वागतत्वं चाऽऽत्मनः सिद्धं चेद्विमोक्षपदार्थस्य निर्णीतत्वाज्ज्ञनकस्य नैराकाङ्क्ष्यमित्याशङ्क्याऽऽह — तथेति ।

यद्यद्वितीयं स्वतोऽसंसारि ब्रह्म वेदान्तप्रमाणकं तर्हि कथमवस्थात्रयविशिष्टा जीवा भोक्तारोऽनुभूयन्ते, भोजयिता चेश्वरः श्रूयते, भोज्यं च विषयजातं पृथगुपलभ्यते ।

तदेतदद्वैते विरुध्येतेत्याशङ्क्य ब्रह्मण्येव जीवा जगदीश्वरश्चेति सर्वं काल्पनिकं सम्भवतीत्यभिप्रेत्याह –

**प्रज्ञानेति ।**

प्रकृष्टं जन्मादिविक्रियाविरहितं कूटस्थं ज्ञानं ज्ञप्तिरूपं वस्तु –

**प्रज्ञानम् ।**

तच्च ब्रह्म । "प्रज्ञानं ब्रह्म"(ऐ. उ. ३ । १ । ३) इति हि श्रूयते

Anandagiri on Shankara's mangala shloka in Mandukya:

अवस्थात्रयस्य मायाकृतस्य मिथ्याभूतस्य प्रतिबिम्बकल्पेष्वस्मासु सम्बन्धितामिवाऽऽपाद्यास्मान् भोजयद् ब्रह्म वर्तते । अतो ब्रह्मण्येवावस्थात्रयम् । ...

आनन्दगिरिटीका (माण्डूक्य)

……… अवस्थात्रयस्य ज्ञेयत्वनिर्देशात्परमार्थतोऽस्तित्वमाशङ्क्य परिहरति – हेयेति । Here Anandagiri says: the avastha traya is an object to the subject, the saakshi.

Vanamaala:

जीवस्यावस्थात्रये बाल्यादिषु चानुवृत्तिरवस्थात्रयस्य बाल्यादीनां च व्यावृत्तिश्चानुभवसिद्धा ; तथा चानुवृत्तिव्यावृत्तिलक्षणाभ्यामन्वयव्यतिरेकाभ्यामेव जीवस्य देहादिभ्यः सकाशाद्यो व्यतिरेकः सिद्धः तदुपोद्बलकतया तं व्यतिरेकमनुवदन्त्यः 'योऽयं विज्ञानमयः' इत्याद्याः श्रुतयो विरुध्येरन्नित्यर्थः ।

Vaiyasika nyayamala of Vidyaranya:

किमर्थं तर्हि जीवाद्यभिधानम् - इति चेत् । प्राणाद्युपाधिभ्यो विवेक्तुमादावभिधानम् । मध्येऽप्यवस्थात्रयसङ्गराहित्यं दर्शयितुमभिधीयते । अन्ते तूक्तजीवस्वरूपमनूद्य तस्य ब्रह्मत्वं प्रतिपाद्यते ।

Thus we see that the 'post-Shankara' Advaitins have accepted and demonstrated the avastha traya prakriya **in the same way** that Shankara has done. There is no evidence to show that they have deviated from Shankara in the Avastha traya prakriya. Nor is there evidence to show that they have 'introduced' the concept of avidya in deep sleep. There is ample evidence in Shankara's bhashya for this. A sample from Shankara has been shown in the foregoing for the concept of 'avidya in sushupti' in seed form. The idea of kaarana-avidya (aavarana Shakti – tattva apratibodha rupa) and kaarya-avidya (vikshepa shakti – anyathaa pratipatti) is also explicitly found in the bhashya on the Mandukya, of which a passage is shown.

We also see here that the entire triad of states is to be considered as an 'object' to the witness self, the subject. There is no method of taking one's sushupti as the reference point to view/analyse the waking and dream. In other words, sushupti too has to be subjected to analysis and rejected as non-atman along with the waking and

dream. No doubt, the advantage of considering the sushupti for the purpose of ‘no duality, no misery, no individual identities, no samsara bandha experience, etc.’ in that state, in contrast to the waking and dream. The Brihadaranyaka upanishad says that in the state of deep sleep the father ceases to be a father, the mother ceases to be a mother, a thief is no thief, etc.  The Janaka-Yajnavalkya conversation is aimed at showing sushupti as an analogy to the state of liberation. The similarity is only partial.

From Dashashloki of Shankaracharya:

न जाग्रन् न मे स्वप्नको वा सुषुप्तिः
न विश्वो न वा तैजसः प्राज्ञको वा ।
अविद्यात्मकत्वात् त्रयाणां तुरीयः
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ८॥

Neither the state of waking nor that of dream nor that of deep-sleep is for me; neither the Visva nor the Taijasa nor the Prajna (am I). Since the three are of the nature of nescience, I am the Fourth. That one which remains (after the sublation of all else) - that auspicious absolute (Self) I am.

Om